# एकलव्यस्य गुरुभक्तिः

## पाठः

आसीत् द्रोणो नाम प्रथितो धनुर्वेदाचार्यः।

There was a famous teacher of archery named Drona.

कदाचित्तस्य धनुर्वेदकौशलं समीक्ष्य कुरुकुलपितामहः भीष्मः तं स्वनगरमानयत्। स्वपौत्रान् कौरवपाण्डवान् तस्य शिष्यान् चकार च।

Once, seeing his (Drona's) excellence in archery, Bhishma ,the grandfather of the Kuru dynasty, brought him to his city, and made his grandsons, the Kauravas and the Pandavas, as his (Drona's) disciples.

स च द्रोणः तान् विद्यायां परिणतान् अकरोत्।

That Drona made them experts in learning.

गुरुः अर्जुनस्य धनुर्वेदे परमं प्रावीण्यं वीक्ष्य अतितरां प्रीतः अवदत् च -

The preceptor, having seen Arjuna's expertise in archery, was pleased very much and said thus-

"अर्जुन, त्वां लोकोत्तरं धनुर्धरं करिष्यामि।" इति

'Arjuna, I will make you the best archer in the world.'

द्रोणस्य कौशलं श्रुत्वा बहवो राजपुत्राः अस्त्राभ्यसाय तत्रागताः।

Hearing Drona's expertise many princes came there to him for practicing archery.

हिरण्यधनुषो निषादराजस्य पुत्रः एकलव्योऽपि द्रोणसमीपमागतः।

Ekalavya, the son of a hunter-king called Hiranyadhanush, also came to Drona.

द्रोणः निषादकुमारमेकलव्यं शिक्षयितुमनिच्छन् अवदत् -

Drona, not willing to teach archery to a hunter's son, said-

"एकलव्य, त्वं मम शिष्योऽसि।

"Ekalavya, you are my disciple.

स्वगृहे एव अस्त्रविद्यां शिक्षस्व।

Learn archery in your own house.

शरप्रयोगे बलवत्तरो भविष्यसि" इति।

You will become an expert in archery."

एकलव्यस्तु द्रोणस्य पादौ शिरसि कृत्वा स्वभवनमागतः।

Ekalavya saluted at the feet of Drona and came back to his house.

तत्र दोणस्य मृण्मयीं प्रतिमां विधाय, तां मूर्तिं सदा पूजयन् स्वयमेव अस्त्रविद्यामशिक्षत।

There, sculpting a mud statue of Drona, and worshipping that statue always, Ekalavya learnt archery by himself.

अचिरादेव अस्त्रविद्यायां प्रावीण्यमलभत।

Very soon he obtained expertise in archery.

एकदा द्रोणस्याज्ञया कौरवपाण्डवाः मृगयां कर्तुं वनमगच्छन्।

Once, by the orders of Drona, Kauravas and Pandavas went to the forest for hunting.

तेषु मृगयां कुर्वत्सु कश्चित् सारमेयः अपरिचितमेकलव्यं दृष्ट्वा अभषत्।

When they were hunting, a certain dog started barking seeing the stranger Ekalavya.

अनुपदमेव स भषतश्शुनो मुखे सप्तशरानपूरयत्।

At the very next moment, he filled seven arrows in the barking dog's mouth.

सः श्वा शरपूर्णास्यः अर्जुनसमीपमागच्छत्।

The dog, its mouth filled with arrows, came near Arjuna.

स तु तं विलोक्य विस्मितः तं शरमोचनप्रवीणमन्विष्यन् भ्रातृभिः सह आगत्य, अविरतं शरान् प्रयुञ्जानम् एकलव्यमपश्यत्।

Seeing that, he (Arjuna) was astonished, and went along with his brothers to investigate that expert archer. There he saw Ekalavya, who was shooting arrows incessantly.

"को, भवान्?" इत्यपृच्छच्च।

"Who are you?", thus he asked.

स तु "निषादाधिपतेः सुतः धनुर्वेदे कृतपरिश्रमः द्रोणशिष्योऽहम्" इत्यवदत्।

He said – "I am son of a hunter king,  one who has put lot of efforts in archery, and a disciple of Drona".

तदाकर्ण्य विस्मिताः सर्वे प्रतिनिवृत्य सर्वमुदन्तं द्रोणाय गुरवे निवेदयामासुः।

Hearing that, all of them were surprised. They returned and told the entire episode to their guru, Drona.

अर्जुनस्तु रहसि द्रोणसन्निधिमागत्य "गुरो, तत्रभवता तु - `त्वां लोकोत्तरं धनुर्धरं करिष्यामि' इति अभिहितम्।

Arjuna came to Drona secretly and said "Oh teacher, you had told me ' I will make you the best archer'.

इदानीं तु अरण्ये भवदन्तेवासी मत्तोऽपि अस्त्रविद्याकुशलतरः एकलव्यो निवसति।

But now, your student named Ekalavya, who is more skilled in archery than me, lives in the forest.

कथमेतत्?" इत्यपृच्छत्।

How is this?" -thus he asked.

द्रोणस्तु मुहूर्तं विचार्य अर्जुनेन सह वनमगच्छत्।

Drona thought for a moment and went  to the forest along with Arjuna.

तत्र स्वाकृतिविराजितप्रतिमायाः पुरतः अस्त्रविद्याभ्यासनिरतं एकलव्यम् अपश्यत्।

There he saw Ekalavya engaged in practicing archery in front of a statue resembling himself.

स तु आयान्तं द्रोणमवलोक्य तमुपसङ्गम्य शिरसा प्रणम्य अर्घ्यपाद्यादिभिः आराधयामास।

Seeing Drona approaching near him, he saluted him and worshipped him with अर्घ्य  (water for washing hand) and पाद्य  (water for washing feet).

द्रोणस्तु प्रीतमनाः - 'यदि मे शिष्योऽसि तर्हि गुरुदक्षिणां देहि' इत्यब्रवीत्।

Drona being pleased said, 'If you are my disciple, give me my Gurudakshina'

`किं प्रदास्यामि? आज्ञापयत्वाचार्यः।

‘What shall I give? Let the preceptor order.

न हि किञ्चित् गुरवे अदेयम्’ इति अतिनम्रः एकलव्यः प्राञ्जलिर्निवेदयामास।

There is nothing which cannot be given to a teacher’,  Ekalavya replied with folded hands.

’तव दक्षिणहस्ताङ्गुष्ठं गुरुदक्षिणार्थे देहि’ इति द्रोणः सुदारुणमगदत्।

‘Give your right thumb as Gurudakshina’- Drona said pitilessly.

द्रोणस्य तादृशं वचनं श्रुत्वा आत्मनः प्रतिज्ञां रक्षन् एकलव्यो मुदा दक्षिणकराङ्गुष्ठं छित्वा द्रोणाय प्रादात्।

Hearing those words of Drona, Ekalvya cut the right thumb with happiness and gave it to Drona in order to protect his oath.

एकलव्यस्य तादृशीं वीरभक्तिं विलोक्य सर्वे विस्मिता अभवन्।

Seeing that valourous devotion of Ekalavya all became astonished.

देवाश्च तस्योपरि कुसुमवृष्टिमवर्षन्।

The Gods showered a rain of flowers on him.

ततः स पूर्ववत् शरान् मोक्तुमसमर्थोऽभवत्।

Since then, he became incapable of releasing arrows like before.

*एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्।*
*पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणीभवेत्।*

अन्वय:

यः गुरुः शिष्यं एकम् एव अक्षरं तु प्रबोधयेत् तद् द्रव्यं पृथिव्यां नास्ति यत् दत्वा च अनृणी भवेत्।

अन्वयार्थः

यः गुर् शिष्यं एकमेवाक्षरं = यः गुरुः शिष्यं एकम् एव अक्षरम्

प्रबोधयेत् = शिक्षयेत्, उपदिशेत्

तद् द्रव्यं = तद् श्रीः

पृथिव्यां = भूमौ

नास्ति = न + अस्ति

यद्दत्वा = यत् + दत्वा

अनृणी भवेत् = ऋणमुक्तः भवेत्

गुरुः एकम् अक्षरम् अपि उपदिशति चेत् पृथिव्यां किमपि धनं नास्ति यत् दत्वा वयं तस्मात् ऋणात् मुक्ताः भवेम।

## अभ्यासः

### १. संस्कृते उत्तरं लिखत -

१. द्रोणाचार्यः कः?

द्रोणाचार्यः एकः प्रथितः धनुर्वेदाचार्यः।

२. तस्य प्रसिद्धः शिष्यः कः?

तस्य प्रसिद्धः शिष्यः अर्जुनः।

३. एकलव्यः कः?

एकलव्यः हिरण्यधनुषो नाम निषादराजस्य पुत्रः।

४. एकलव्यः किमर्थं द्रोणस्य समीपमागच्छत्?

एकलव्यः अस्त्राभ्यासार्थं द्रोणस्य समीपमागच्छत्।

५. द्रोणः तस्मै किमुत्तरं प्रायच्छत्?

द्रोणः निषादकुमारमेकलव्यं शिक्षयितुमनिच्छन् अवदत् - 'एकलव्य, त्वं मम शिष्योऽसि। स्वगृहे एव अस्त्रविद्यां शिक्षस्व। शरप्रयोगे बलवत्तरो भविष्यसि' इति।

### २. ससन्दर्भं विवृणुत -

१. शरप्रयोगे बलवत्तरः भविष्यसि।

| | |
|---|---|
| कः पाठः? | एकलव्यस्य गुरुभक्तिः |
| कः अवदत्? | द्रोणः अवदत् |
| कं प्रति अवदत्? | एकलव्यं प्रति अवदत् |
| कदा अवदत्? | यदा एकलव्यः अस्त्राभ्यासाय द्रोणसमीपमागतः तदा निषादकुमारमेकलव्यं शिक्षयितुं अनिच्छन् द्रोणः एवं अवदत्- 'एकलव्य, त्वं मम शिष्योऽसि। स्वगृहे एव अस्त्रविद्यां शिक्षस्व। शरप्रयोगे बलवत्तरो भविष्यसि' इति। |

२. त्वां लोकोत्तरं धनुर्धरं करिष्यामि।

| | |
|---|---|
| कः पाठः? | एकलव्यस्य गुरुभक्तिः |
| कः अवदत्? | द्रोणः अवदत् |
| कं प्रति अवदत्? | अर्जुनं प्रति अवदत् |
| कदा अवदत्? | गुरुः द्रोणः अर्जुनस्य धनुर्वेदे परमं कौशलं वीक्ष्य अतितरां प्रीतः एवं अवदत् |

३. न हि किञ्चित् गुरवे अदेयम्।

| | |
|---|---|
| कः पाठः? | एकलव्यस्य गुरुभक्तिः |
| कः अवदत्? | एकलव्यः अवदत् |
| कं प्रति अवदत्? | द्रोणं प्रति अवदत् |
| कदा अवदत्? | यदा द्रोणः एकलव्येन गुरुदक्षिणाम् अपृच्छत् तदा एकलव्यः एवम् अवदत् |

**३. पर्यायपदानि लिखत -**

| पदम् | पर्यायपदानि |
|---|---|
| **कोविदः** | पण्डितः, ज्ञः, प्राज्ञः, विद्वान्। |
| **प्रथितः** | ख्यातः, विश्रुतः। |
| **अन्तिकम्** | समीपम्, निकटम् । |
| **प्रतिकृतिः** | प्रतिमानम्, प्रतिबिम्बं, प्रतिमा । |
| **सारमेयः** | कुक्कुरः, शुनकः, श्वा । |
| **आस्यम्** | मुखम्, वदनम्, वक्त्रम्। |

**४. दोषान् परिहरत**

| दोषपूरितम् | दोषपरिहारः |
|---|---|
| **भवान् गच्छ** | भवान् गच्छतु |
| **द्रोणस्य सह अर्जुनः अगच्छत्** | द्रोणेन सह अर्जुनः अगच्छत् |
| **ग्रामस्य समया उपवनम् अस्ति** | ग्रामं समया उपवनम् अस्ति |